## ।। द्वितीयः साधन-पादः ।।

उद्दिष्टः समाहित-चित्तस्य योगः । कथं व्युत्थित-चित्तः+अपि योग-युक्तः+स्यात्+इति+एतत्+आदारभ्यते—

तपः-स्वाध्याय+ईश्वर-प्रणिधानानि क्रिया-योगः ॥१॥

न+अतपस्विनः+ योगः सिद्ध्यति । अनादि-कर्म-क्लेश-वासनाचित्रा प्रत्युपस्थित-विषयजाला च+अशुद्धिः+न+अन्तरेण तपः सम्भेदमापद्यत इति तपसः+ उपादानम् । तत्+च चित्त-प्रसादनम्+अबाधमानमनेन+आसेव्यमिति मन्यते । स्वाध्यायः प्रणवादि-पवित्राणां जपः+ मोक्ष-शास्त्र-अध्ययनं वा ईश्वर-प्रणिधानं सर्वक्रियाणां परम-गुरौ+अर्पणं तत्+फल-संन्यासः+ वा ॥१॥

समाधि-भावनार्थः क्लेश-तनू-करणार्थः+च ॥२॥

सः+ हि+आसेव्यमानः समाधिं भावयति क्लेशान्+च प्रतनूकरोति । प्रतनूकृतान्+क्लेशान्+प्रसङ्ख्यान+अग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्यति+इति । तेषां तनूकरणात्+पुनः क्लेशैः+अपरामृष्टा सत्त्वपुरुषान्यताख्यातिः सूक्ष्मा प्रज्ञा समाप्ताधिकारा प्रतिप्रसवाय कल्पिष्यतः+ इति ॥२॥
अथ के ते क्लेशाः ?

अविद्या+अस्मितारागद्वेष+अभिनिवेशाः क्लेशाः ॥३॥

क्लेशाः+ इति । पञ्चविपर्ययाः+ इत्यर्थः । ते स्यन्दमाना गुणाधिकारं द्रढयन्ति, परिणाममवस्थापयन्ति, कार्यकारणस्रोत उन्नमयन्ति, परस्परानुग्रहतन्त्रीभूय कर्मविपाकं चाभिनिर्हरन्ति+इति ॥३॥

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नः+उदाराणाम् ॥४॥

अत्र+अविद्या क्षेत्रं प्रसवभूमिः+उत्तरेषाम्+अस्मितादीनां चतुर्विध-विकल्पानां प्रसुप्त-तनु-विच्छिन्नः+उदाराणाम् । तत्र का प्रसुप्तिः ? चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावः+उपगमः । तस्य प्रबोध आलम्बने सम्मुखीभावः । प्रसङ्ख्यानवतो दग्धक्लेशबीजस्य सम्मुखीभूते+अपि+आलम्बने न+असौ पुनः+अस्ति । दग्धबीजस्य कुतः प्ररोह इति । अतः क्षीणक्लेशः कुशलः+चरमदेह इति+उच्यते ।

तत्र+एव सा दग्धबीजभावा पञ्चमी क्लेशावस्था न+अन्यत्र+इति । सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य सम्मुखीभावे+अपि सति न भवति+एषां प्रबोधः+ इति । उक्ता प्रसुप्तिः+दग्धबीजानाम्-अप्ररोहः+च । तनुत्वम्+उच्यते—प्रतिपक्षभावनोपहताः क्लेशाः+तनवो भवन्ति । तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः समुदाचरन्ति+इति विच्छिन्नाः । कथं ? रागकाले अक्रोधस्य+अदर्शनात्। न हि रागकाले क्रोधः समुदाचरति । रागः+च क्वचिद्दृश्यमानो न विषयान्तरे नास्ति । न+एकस्यां स्त्रियां चैत्रः+ रक्तः+ इति+अन्यासु स्त्रीषु विरक्तः+ इति । किन्तु तत्र रागः+ लब्धवृत्तिः+अन्यत्र तु भविष्य-द्वृत्तिः+इति । सः+ हि तदा प्रसुप्त-तनु-विच्छिन्नः+ भवति । विषये यः+ लब्ध-वृत्तिः सः+ उदारः । सर्व एवैते क्लेश-विषयत्वं न+अतिक्रामन्ति । कः+तर्हि विच्छिन्नः प्रसुप्त-तनु-उदारः+ वा क्लेशः+ इति । उच्यते—सत्यम्+एव+एतत्। किन्तु विशिष्टानामेव+एतेषां विच्छिन्नादित्वम् । यथा+एव प्रतिपक्ष-भावनातः+ निवृत्तः+तथा+एव स्वव्यञ्जकाञ्जनेनाभिव्यक्तः+ इति ।

सर्व एव+अमी क्लेशाः+ अविद्या-भेदाः । कस्मात्? सर्वेषु-अविद्य-एव-अभिप्लवते । यद्-अविद्यया वस्त्वाकार्यते, तत्+एव-अनुशेरते क्लेशा विपर्यास-प्रत्ययकाले उपलभ्यन्ते क्षीयमाणां च+अविद्यामनु क्षीयन्तः+ इति ॥४॥

तत्र+अविद्या-स्वरूपम्-उच्यते—

अनित्या-शुचि-दुःख+अनात्मसु नित्य-शुचि-सुख+आत्मख्यातिः+अविद्या ॥५॥

अनित्ये कार्ये नित्यख्यातिः । तद्यथा, ध्रुवा पृथिवी, ध्रुवा सचन्द्रतारका द्यौः, अमृता दिवौकसः+ इति । तथा+अशुचौ परमबीभत्से काये । उक्तं च—

स्थानाद्-बीजात्-उपष्ठम्बान्निःस्यन्दान्निधनाद्-अपि ।
कायमाधेयशौचत्वात्पण्डिता हि-अशुचिं विदुः ॥

इति+अशुचौ शरीरे शुचि-ख्यातिः+दृश्यते । नवेव शशाङ्कलेखाकमनीयेयं कन्या मध्वमृतावयवनिर्मितेव चन्द्रं भित्त्वा निःसृतेव ज्ञायते, नीलोत्-पलपत्रायताक्षी हावगर्भाभ्यां लोचनाभ्यां जीव-लोकमाश्वासयन्तीवेति कस्य केनाभि-सम्बन्धः? भवति च-एवम्-अशुचौ शुचि-विपर्यास-प्रत्यय इति । एतेन-अपुण्ये पुण्य-प्रत्ययः-तथैव-अनर्थे च-अर्थ-प्रत्ययः+ व्याख्यातः । तथा दुःखे सुख-ख्यातिं वक्ष्यति—परिणाम-ताप-संस्कार-दुःखैः+गुणवृत्ति-विरोधात्-च दुःखमेव सर्वं विवेकिनः [यो.सू. २.१५] इति । तत्र सुख-ख्यातिः+अविद्या । तथा+अनात्मनि+आत्म-ख्यातिः+बाह्योपकरणेषु चेतन-अचेतनेषु भोग-अधिष्ठाने वा शरीरे, पुरुष-उपकरणे वा मनसि-अनात्मनि-आत्मख्यातिः+इति । तथा+एतत्-अत्र+उक्तम्—व्यक्तम्-अव्यक्तं वा सत्त्वमात्मत्वेन-अभिप्रतीत्य तस्य सम्पदमनुनन्दत्यात्मसम्पदं मन्वानस्तस्य व्यापदमनुशोचत्यात्मव्यापदं मन्वानः स सर्वोऽतिबुद्धः+ इति ।

एषा चतुष्पदा भवति+अविद्या मूलमस्य क्लेशसन्तानस्य कर्माशयस्य च सविपाकस्येति । तस्याः+चः+अमित्रा-गोष्पदवत्-वस्तुसतत्त्वं विज्ञेयम् । यथा नामित्रौ मित्राभावः न मित्रमात्रं किन्तु तद्विरुद्धः सपत्नः । तथा चागोष्पदं न गोष्पद-अभावः+ न गोष्पदमात्रं किन्तु देश एव ताभ्यामन्यद्वस्त्वन्तरम् । एवम्-अविद्या न प्रमाणं न प्रमाणाभावः, किन्तु विद्या-विपरीतं ज्ञानान्तरम्-अविद्येति ॥५॥

दृक्+दर्शन-शक्त्योः+एकात्मता+एव-अस्मिता ॥६॥

पुरुषः+ दृक्-शक्तिः-बुंद्धिः-दर्शन-शक्तिः-इति-एतयोः-एकस्वरूपापत्तिः-एवा-अस्मिता क्लेशः+ उच्यते । भोक्तृ-भोग्य-शक्त्योः-अत्यन्तविभक्तयोः-अत्यन्ता-सङ्कीर्णयोः-अविभागप्राप्तौ-इव सत्यां भोगः कल्पते । स्वरूपप्रतिलम्भे तु तयोः कैवल्यमेव भवति कुतोः+ भोगः+ इति । तथा चोक्तं—बुद्धितः परं पुरुषमाकारशीलविद्यादिभिः-विभक्तमपश्यन्कुर्यात्तत्रात्मबुद्धिं मोहेनेति ॥६॥

सुख-अनुशयी रागः ॥७॥

सुखाभिजातस्य सुखानुस्मृतिपूर्वः सुखे तत्साधने वा यो गर्धस्तृष्णा लोभः स रागः+ इति ॥७॥

दुःख-अनुशयी द्वेषः ॥८॥

दुःख-अभिज्ञस्य दुःखानुस्मृतिपूर्वो देस्तत्साधने वा यः प्रतिघो मन्युर्जिघांसा क्रोधः स द्वेष इति ॥८॥

स्वरसवाही विदुषः+अपि तथा-आरूढोः-अभिनिवेशः ॥९॥

सर्वस्य प्राणिन इयमात्माशीः-नित्या भवति, मा न भूवं भूयासमिति । न च-अननुभूत-मरणधर्मकस्य-एषा भवति-आत्माशीः । एतया च पूर्वजन्मानुभवः प्रतीयते, सः+ च+अयमभिनिवेशः क्लेशः स्वरसवाही कृमेरपि जातमात्रस्य प्रत्यक्ष-अनुमानागमैः-असम्भावितौ मरणत्रास उच्छेददृष्ट्यात्मकः पूर्वजन्म-अनुभूतं मरण-दुःखम्-अनुमापयति । यथा च-अयम्-इति-अन्तमूढेषु दृश्यते क्लेशः+तथा विदुषः+अपि विज्ञातपूर्वापरान्तस्य रूढः । कस्मात्समाना हि तयोः कुशल-अकुशलयोः-मरणदुःख-अनुभवादियं वासनेति ॥९॥

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥१०॥

ते पञ्चक्लेशाः दग्धबीजकल्पा योगिनः+चरित-अधिकारे चेतसि प्रलीने सह तेनैवास्तं गच्छन्ति ॥१०॥

स्थितानां तु बीजभाव+उपगतानां—

ध्यान-हेयाः-तद्वृत्तयः ॥११॥

क्लेशानां या वृत्तयः स्थूलास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसङ्ख्यानेन ध्यानेन हातव्या यावत्-सूक्ष्मीकृता यावत्-द्ग्धबीजकल्पा इति । यथा च वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते पश्चात् सूक्ष्मः+ यत्नेन+उपायेन च-अपनीयते, तथा स्वल्प-प्रतिपक्षाः स्थूला वृत्तयः क्लेशानां, सूक्ष्मास्तु महाप्रतिपक्षा इति ॥११॥

क्लेश-मूलः कर्माशयो दृष्टा-अदृष्ट-जन्मवेदनीयः ॥१२॥

तत्र पुण्य-अपुण्य-कर्माशयः काम-लोभ-मोह-क्रोधप्रसवः । सः+ दृष्ट-जन्मवेदनीयः+च+अदृष्ट-जन्मवेदनीयश्च । तत्र तीव्रसंवेगेन मन्त्र-तपःसमाधिभिः+निर्वर्तित ईश्वर-देवता-महर्षि-महानुभावानाम-आराधनात्+वा यः परिनिष्पन्नः सः+ सद्यः परिपच्यते पुण्य-कर्माशय इति । तथा तीव्र-क्लेशेन भीतव्या-अधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरुपकारः स चापि पापकर्माशयः सद्य एव परिपच्यते । यथा नन्दीश्वरः कुमारः+ मनुष्यपरिणामं हित्वा देवत्वेन परिणतः, तथा नहुषः+अपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्त्वेन परिणत इति । तत्र नारकाणां नास्ति दृष्ट-जन्म-वेदनीयः कर्माशयः । क्षीण-क्लेशानामपि न+अस्ति-अदृष्ट-जन्मवेदनीयः कर्माशय इति ॥१२॥

सति मूले तत् +विपाको जाति-आयुः+भोगाः ॥१३॥

सत्सु क्लेशेषु कर्माशयो विपाकारम्भो भवति नोच्छिन्न-क्लेश-मूलः । यथा तुषावनद्धाः शालि-तुण्डला अदग्ध-बीजभावाः प्ररोहसमर्था भवन्ति, नापनीततुषा दग्धबीज-भावा वा, तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति, नापनीतः-क्लेश+ न प्रसङ्ख्यान-दग्ध-क्लेश-बीजभावः+ वा+इति । सः+ च विपाक-स्त्रिविधो

जाति-आयुः+भोगः+ इति । तत्रेदं विचार्यते—किमेकं कर्मैकस्य जन्मनः कारणमथैकं कर्मानेकं जन्माक्षिपतीति ? द्वितीया विचारणा—किमनेकं कर्मानेकं जन्म निर्वर्तयत्यथानेकं कर्मैकं जन्म निर्वर्तयतीति ? न तावदेकं कर्मैकस्य जन्मनः कारणम् । कस्मात्? अनादिकाल-प्रचितस्य+असङ्ख्येयस्य+अवशिष्टस्य कर्मणः साम्प्रतिकस्य च फल-क्रमानियमादना-श्वासः+ लोकस्य प्रसक्तः । सः+ च+अनिष्टः इति । न च+एकं कर्मानेकस्य जन्मनः कारणम् । कस्मात्? अनेकेषु कर्मसु+एकैकमेव कर्मानेकस्य जन्मनः कारणमिति+अवशिष्टस्य विपाककालाभावः प्रसक्तः च च+अपि+अनिष्टः इति । न च+अनेकं कर्मानेकस्य जन्मनःकारणम् । कस्मात्? तत्+अनेकं जन्म युगपत्+न सम्भवति+इति क्रमेणि+एव वाच्यम् । तथा च पूर्वदोषानुषङ्गः ।

तस्मात्+जन्मप्रायणान्तरे कृतः पुण्य-अपुण्यकर्माशय-प्रचयः विचित्रः प्रधान-उपसर्जन-भावेन-अवस्थितः प्रायण-अभिव्यक्त एकप्रघट्टकेन मिलित्वा मरणं प्रसाध्य सम्मूर्च्छित एकम्-एव जन्म करोति । तच्च जन्म तेन+एव कर्मणा लब्धायुष्कं भवति । तस्मिन्+आयुषि तेन+एव कर्मणा भोगः सम्पद्यत इति । असौ कर्माशयः+ जन्म-आयुः+भोग-हेतुत्वात्-त्रिविध-पाकः-अभिधीयत इति । अत एकभविक कर्माशयः+उक्तः+ इति ।

दृष्ट-जन्म-वेदनीयः-तु-एक-विपाकारम्भी भोग-हेतुत्वात्, द्विपाकारम्भी वा आयुः-भोग-हेतुत्वात्-नदीश्वरवत्-नहुषवत्+वा इति । क्लेश-कर्म-विपाक-आनुभव-निर्वर्तिताभिः+तु वासनाभिः+अनादिकाल-सम्मूर्च्छितम्-इदं चित्तं चित्रीकृतम्-इव सर्वतो मत्स्य-जालं ग्रन्थिभिः-इव-ततम्-इति-एता अनेक-भव-पूर्विका वासनाः । यः+तु+अयं कर्माशयः एषः एवैकभविकः उक्त इति । ये संस्काराः स्मृति-हेतवः+ता वासनाः+ताः+च+अनादिकालीना इति । यस्त्वसावेकभविकः कर्माशयः+ सः+ नियत-विपाकः+च+अनियत-विपाकः+च । तत्र+अदृष्ट-जन्म-वेदनीयस्य नियत-विपाकस्य-एव+अयं नियमः+ न तु+अदृष्टजन्मवेदनीयः+स्यात्- नियत-विपाकस्य । कस्मात्? यः+ हि+अदृष्ट-जन्म-वेदनीयः-अनियत-विपाकः+तस्य त्रयी गतिः—कृतस्य-

अविपक्वस्य नाशः प्रधान-कर्मणि-अवापगमनं वा, नियत-विपाक-प्रधान-कर्मण-अभिभूतस्य वा चिरम-अवस्थानम्-इति । तत्र कृतस्य-अविपक्वस्य नाशः+ यथा शुक्ल-कर्म-उदयात्-इह-एव नाशः कृष्णस्य । यत्र-इदम्-उक्तम्—

"द्वे द्वे ह वै कर्मणी वेदितव्ये पापकस्य-एकः+ राशिः पुण्य-कृतःउपहन्ति ।
तद्-इच्छस्व कर्माणि सुकृतानि कर्तुं इह-एव ते कर्म कवयः+ वेदयन्ते ॥"

प्रधान-कर्मणि+अवापगमनम् । यत्र+इदम्-उक्तम्—"स्यात्-स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य न-अपकर्षायालम् । कस्मात्? कुशलं हि मे बहु-अन्यत्+अस्ति यत्र+अयम्-अवापं गतः स्वर्गेपि-अपकर्षमल्पं करिष्यति" इति । नियत-विपाक-प्रधान-कर्मण-अभिभूतस्य वा चिरम्-अवस्थानम् । कथमिति ? अदृष्ट-जन्मवेदनीयस्य-एव नियत-विपाकस्य कर्मणः समानं मरणम्-अभिव्यक्ति-कारणम्-उक्तम्, न तु-अदृष्ट-जन्म-वेदनीय-अनियत-विपाकस्य । यः+तु-तत्+अदृष्ट-जन्म-वेदनीयं कर्मानियत-विपाकं तत्-नश्येदावापं वा गच्छेत्-अभिभूतं वा चिरम्-अपि-उपासीत, यावत्-समानं कर्म-अभिव्यञ्जकं निमित्तमस्य न विपाक-अभिभूतं करोति-इति तत्+विपाकस्य+एव देश-काल-निमित्त-अनवधारणादियं कर्म-गतिः+चित्रा दुर्विज्ञाता च+इति । न च-उत्सर्गस्य-अपवादात्-निवृत्तिः+इति+एक-भविकः कर्माशयः+अनुज्ञायत इति ॥१३॥

ते ह्लादपरिताप-फलाः पुण्य-अपुण्य-हेतुत्वात्॥१४॥

ते जन्म-आयुः-भोगाः पुण्य-हेतुकाः सुख-फला, अपुण्य-हेतुकाः दुःखफला इति । यथा चेदं दुःखं प्रतिकूलात्मकम्-एवं विशेष-सुख-काले-अपि दुःखम्-अस्ति-एव प्रतिकूलात्मकं योगिनः ॥१४॥

कथं तत्-उपपद्यते ?

परिणाम-ताप-संस्कार-दुःखैः+गुण-वृत्ति-विरोधात्+च दुःखम्-एव सर्वं विवेकिनः ॥१५॥

सर्वस्यायं राग-अनुविद्धः+चेतन-अचेतन-साधना+आधीनः सुख-अनुभव इति तत्र+अस्ति रागजः कर्माशयः । तथा च द्वेष्टि दुःख-साधनानि मुह्यति चेति द्वेष-मोह-कृतः+अपि+अस्ति कर्माशयः । तथा चोक्तम् । नानुपहत्य भूतानि+उपभोगः सम्भवति+इति हिंसाकृतः+अपि+अस्ति शारीरः कर्माशय इति । विषय-सुखं च+अविद्य+इति+उक्तम् । या भोगेषु+इन्द्रियाणां तृप्तेः+उपशान्तिः+तत्-सुखम् । या लौल्यात्+अनुपशान्ति+तत् +दुखम् । न च+इन्द्रियाणां भोग-अभ्यासेन वैतृष्ण्यं कर्तुं शक्यम् । कस्मात्? यतः+ भोग-अभ्यासम्-अनुविवर्धन्ते रागाः कौशलानि च+इन्द्रियाणाम्+इति तस्मात्+अनुपायः । सुखस्य भोग-अभ्यासः+ इति । सः+ खलु+अयं वृश्चिक-विष-भीत इव-अशीविशेण दष्टः+ यः सुखार्थी विषय-अनुवासितो महति दुःख-पङ्के निमग्नः+ इति । एषा परिणाम-दुःखता नाम प्रतिकूला सुखान्वस्थायाम्-अपि योगिनम्-एव क्लिश्नाति ।

अथ का ताप-दुःखता ? सर्वस्य द्वेष-अनुविद्धः+चेतन-अचेतन-साधन-अधीनः+ताप+अनुभवः+ इति । तत्र+अस्ति द्वेषजः कर्माशयः । सुख-साधनानि च प्रार्थयामानः कायेन वाचा मनसा च परिस्पन्दते । ततः परमनुगृह्णाति+उपहन्ति च+इति परानुग्रह-पीडाभ्यां धर्म-अधर्मौ-उपचिनोति । सः+ कर्माशयः+ लोभात्+मोहात्+च भवति+इति+एषा ताप-दुःखतोच्यते । का पुनः संस्कार-दुःखता ? सुख-अनुभवात्-सुख-संस्कार-आशयः+ दुःख-अनुभवात्+अपि दुःख-संस्काराशय इति ? एवं कर्मभ्यो विपाके+अनुभूयमाने सुखे दुःखे वा पुनः कर्माशय-प्रचयः+ इति ।

एवम्-इदम्-अनादि-दुःख-स्रोतः+ विप्रसृतं योगिनम्+एव प्रतिकूल-आत्मकत्वात्+उद्वेजयति । कस्मात्? अक्षि-पात्र-कल्पः+ हि विद्वान्-इति । यथा+ऊर्णा-तन्तुःअक्षि-पात्रे न्यस्तः स्पर्शेन दुःखयति न च+अन्येषु गात्र-अवयवेषु । एवम्+एतानि दुःखानि+अक्षि-पात्र-कल्पं योगिनम्+एव क्लिश्नन्ति न+ इतरं प्रतिपत्तारम् । इतरं तु स्वकर्म-उपहृतं दुःखम्-उपात्तम्-उपात्तं त्यजन्तं त्यक्तं त्यक्तम्-उपाददानम्-अनादि-वासना-विचित्रया चित्त-वृत्त्या समन्ततः+अनुविद्धम्-इव-अविद्यया हातव्य एव-अहङ्कारम्-अकारान्-उपातिनं जातं जातं

बाह्य-आध्यात्मिक-उभय-निमित्ताः+त्रिपर्वाणः+तापा अनुप्लवन्ते । तत्-एवम्-अनादि-दुःख-स्रोतसा व्युह्यमानम्-आत्मानं भूत-ग्रामं च दृष्ट्वा योगी सर्व-दुःख-क्षय-कारणं सम्यक्+दर्शनं शरणं प्रपद्यत इति ।

गुणवृत्ति-विरोधात्+च दुःखम्+एव सर्वं विवेकिनः । प्रख्या-प्रवृत्ति-स्थिति-रूपा बुद्धि-गुणाः परस्पर-अनुग्रह-तन्त्रीभूय शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणम्-एव-आरम्भन्ते । चलं च गुणवृत्तम्-इति क्षिप्र-परिणामि चित्तम्-उक्तम् । रूप-अतिशया वृत्ति-अतिशयाः+च परस्परेण विरुद्ध्यन्ते । सामान्यानि तु+अतिशयैः सह प्रवर्तन्ते । एवम्-एते गुणा इतर+इतर-आश्रयेण-उपार्जित-सुख-दुःख-मोह-प्रत्यया इति सर्वे सर्वरूपा भवति । गुण-प्रधान-भाव-कृतः+तु+एषां विशेष इति । तस्मात्+दुःखम्-एव सर्वविवेकिनः+ इति । तदस्य महतो दुःख-समुदायस्य प्रभव-बीजम्+अविद्या । तस्या+च सम्यक्+दर्शनम्-अभावहेतुः । यथा चिकित्सा-शास्त्रं चतुर्व्यूहं—रोगो रोग-हेतुः+आरोग्यं भैषज्यम्-इति । एवम्-इदम्-अपि शास्त्रं चतुर्व्यूहम्-एव । तत्+यथा—संसारः संसार-हेतुः+मोक्षः+ मोक्षः+उपायः+ इति । तत्र दुःख-बहुलः संसारो हेयः । प्रधान-पुरुषयोः संयोगो हेयहेतुः । संयोगस्य-अत्यन्तिकी निवृत्तिः+हानम् । हानोपायः सम्यक्+दर्शनम् । तत्र हातुः स्वरूपम्+उपादेयं वा हेयं वा न भवितुम्+अर्हति । हाने तस्योच्छेदवात्-अप्रसङ्गः, उपादाने च हेतुवादः । उभय-प्रत्याख्याने च शाश्वतवाद इति+एतत्+सम्यक्+दर्शनम् ॥१५॥
तत्+एतत्+शास्त्रं चतुर्-व्यूहम्+इति+अभिधीयते—

हेयं दुःखम्-आनागतम् ॥१६॥

दुःखम्-अतीतम्-उपभोगेन-अतिवाहितं न हेयपक्षे वर्तते वर्तमानं च स्वक्षणे भोग-आरूढम्+इति न तत्क्षणान्तरे हेयताम्+आपद्यते तस्मात्+एव+अनागतं दुःखं तत्+एव+अक्षि-पात्र-कल्पं योगिनं क्लिश्नाति, न+इतरं प्रतिपत्तारम् । तत्+एव हेयताम्+आपद्यते ॥१६॥
तस्मात्+एव हेयम्+इति+उच्यते, तस्य+एव कारणं प्रतिनिर्दिश्यते—

द्रष्टृ-दृश्ययोः संयोगः+ हेय-हेतुः ॥१७॥

द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः । दृश्या बुद्धि-सत्त्व-उपारूढाः सर्वे धर्माः । तत्+एतत्+दृश्यम्-अयस्कान्त-मणिकल्पं सन्निधि-मात्र-उपकारि दृश्यत्वेन स्वं भवति पुरुषस्य दृशि-रूपस्य स्वामिनः । अनुभव-कर्म-विषताम्-आपन्नम्-अन्य-स्वरूपेण प्रतिलब्ध-आत्मकम् । स्वतन्त्रम्-अपि परार्थत्वात्-परतन्त्रम् । तयोः+दृक्+दर्शन-शक्त्योः+अनादिः+अर्थ-कृतः संयोगः+ हेय-हेतुः+दुःखस्य कारणम्+इत्यर्थः । तथा च+उक्तम्—तत्-संयोग-हेतु-वर्जनात्-स्यात्-अयम्-आत्यन्तिको दुःख-प्रतीकारः । कस्मात्? दुःख-हेतोः परिहार्यस्य प्रतीकार-दर्शनात्। तत्+यथा पादतलस्य भेद्यता, कण्टकस्य भेत्तृत्वं, परिहारः, कण्टकस्य पादानधिष्ठानं पादत्राण-व्यवहितेन वाधिष्ठानम् । एतत्-त्रयं यः+ वेदः+ लोके सः+ तत्र प्रतीकारम्-आरम्भमाणः+ भेदजं दुःखं न+आप्नोति । कस्मात्? त्रित्वोपलब्धि-सामर्थ्यात्+इति । अत्र+अपि तापकस्य रजसः सत्त्वमेव तप्यम् । कथं तपि-क्रियायाः कर्मस्थत्वात्, सत्त्वे कर्मणि तपिक्रिया न+अपरिणामिनि निष्क्रिये क्षेत्रज्ञे । दर्शित-विषयत्वात्-सत्त्वे तु तप्यमाने तदाकार-अनुरोधी पुरुषः+अनुतप्यत इति ॥१७॥
दृश्य-स्वरूपम्+उच्यते—

प्रकाश-क्रिया-स्थिति-शीलं भूत+इन्द्रियात्मकं भोग+अपवर्गार्थं दृश्यम् ॥१८॥

प्रकाश-शीलं सत्त्वम् । क्रिया-शीलं रजः । स्थिति-शीलं तमः+ इति । एते गुणाः परस्पर-उपरक्त-प्रविभागाः संयोग-विभाग-धर्मणीतरेतरोपाश्रयेण+उपार्जित-मूर्तयः परस्पर-अङ्ग-अङ्गित्वे+अपि+असम्भिन्न-शक्ति-प्रविभागाः । तुल्य-जातीया-तुल्य-जातीयशक्ति-भेदानुपातिनः । प्रधानवेलायाम्+उपदर्शितसन्निधाना गुणत्वे+अपि च व्यापार-मात्रेण प्रधान-अन्तर्नीत-अनुमित-अस्तिताः पुरुषार्थ-कर्तव्यतया प्रयुक्त-सामर्थ्याः सन्निधि-मात्र-उपकारिणः+अयस्कान्त-मणि-कल्पाः । प्रत्ययम्+अन्तरेण+एकतमस्य वृत्तिम्+अनुवर्तमानाः प्रधान-शब्दवाच्याः+ भवन्ति । एतत्+दृश्यम्+इति+उच्यते । तदेतद्+दृश्यं भूतेन्द्रियात्मकं भूत-भावेन पृथिव्यादिना

सूक्ष्म-स्थूलेन परिणमते । तथा+इन्द्रियभावेन श्रोत्रादिना सूक्ष्म-स्थूलेन परिणमत इति । तत्तु नाप्रयोजनम्, अपि तु प्रयोजनम्+उररीकृत्य प्रवर्तत इति भोग-अपवर्गार्थं हि तद्दृश्यं पुरुषस्येति । तत्र+इष्ट-अनिष्ट-गुण-स्वरूप-अवधारणम्-अविभागापन्नं भोगः । भोक्तुः स्वरूप-अवधारणम्-अपवर्गः इति द्वयोः+इति-रिक्तम्-अन्यद्दर्शनं नास्ति ।

तथा चोक्तं—"अयं तु खलु त्रिषु गुणेषु कर्तृषु+अकर्तरि च पुरुषे तुल्य-अतुल्यजातीये चतुर्थे तत्-क्रिया-साक्षिणि-उपनीयमानान्-सर्व-भावान्-उपपन्नान्-अनुपश्यन्त दर्शनम्-अन्यच्छङ्कत" इति । तावेतौ भोग-अपवर्गौ बुद्धि-कृतौ बुद्धौ+एव वर्तमानौ कथं पुरुषे व्यपदिश्येते इति । यथा च जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते, स हि तस्य फलस्य भोक्तेति । एवं बन्ध-मोक्षौ बुद्धौ+एव वर्तमानौ पुरुषे व्यपदिश्येते बुद्धेः+एव पुरुषार्थापरिसमाप्तिः+बन्धः+तदर्थावसायो मोक्षः+ इति । एतेन ग्रहण-धारण-उहापोह-तत्त्वज्ञान-अभिनिवेशा बुद्धौ वर्तमानाः पुरुषे-अध्यारोपित-सद्भावाः । सः+ हि तत्+फलस्य भोक्त-इति ॥१८॥

दृश्यानां तु गुणानां स्वरूप-भेद-अवधारणार्थम्+इदम्+आरभ्यते—

विशेष-अविशेष-लिङ्गमात्र-अलिङ्गानि गुणपर्वाणि ॥१९॥

तत्र-आकाश-वायु-अग्नि-उदक-भूमयो भूतानि शब्द-स्पर्श-रूप-रस-गन्ध-तन्मात्राणाम्-अविशेषाणां विशेषाः । तथा श्रोत्र-त्वक्-चक्षुः+जिह्वा-घ्राणानि बुद्धि-इन्द्रियाणि । वाक्-पाणि-पाद-पायु-उपस्थानि कर्मेन्द्रियाणि । एकादशं मनः सर्वार्थम् । इति+एतानि+अस्मिता-लक्षणस्य+अविशेषस्य विशेषाः । गुणानाम्+एषः+ षोडशकः+ विशेष-परिणामः ।

षड-विशेषाः । तत्+यथा—शब्द-तन्मात्रं, स्पर्श-तन्मात्रं, रूप-तन्मात्रं, रस-तन्मात्रं, गन्ध-तन्मात्रं च+इति+एक-द्वि-त्रि-चतुष्-पञ्च-लक्षणाः शब्दादयः पञ्च-अविशेषाः, षष्ठः+च+अविशेषः+अस्मितामात्रः+ इति । एते सत्तामात्रस्य+आत्मनः+ महतः षट्+अविशेष-परिणामाः । यत्+तत्परम्+अविशेषेभ्यः+ लिङ्ग-मात्रं महत्तत्त्वं तस्मिन्+एते, सत्ता-मात्रे महति-आत्मनि-अवस्थाय विवृद्धिकाष्ठाम्-अनुभवन्ति । प्रतिसंमृज्यमानाः+च

तस्मिन्+एव सत्तामात्रे महति-आत्मनि-अवस्थाय यत्तन्निःसत्ता-असत्तं निःसदसन्+निरसद्+अव्यक्तम्-अलिङ्गं प्रधानं तत्प्रतियन्तीति । एष तेषां लिङ्गमात्रः परिणामः । निःसत्ताऽसत्तं चालिङ्गपरिणामः+ इति । अलिङ्गावस्थायां न पुरुषार्थो हेतुः । नालिङ्गावस्थायामादौ पुरुषार्थता कारणं भवतीति । न तस्याः पुरुषार्थता कारणं भवति । नासौ पुरुषार्थकृतेति नित्याख्यायते । त्रयाणां त्ववस्था-विशेषाणाम्-आदौ पुरुषार्थता कारणं भवति । स चार्थो हेतुः+निमित्तं कारणं भवति+इति+अनित्याख्यायते । गुणास्तु सर्वधर्मानुपातिनः+ न प्रत्यस्तमयन्ते न+ उपजायन्ते । व्यक्तिभिः+एव+अतीत-अनागत-व्ययागमवतीभिः+गुणान्वयिनीभिः+उपजननापायधर्मः का इव प्रत्यवभासन्ते । यथा देवदत्तो दरिद्राति । कस्मात्? यतः+अस्य म्रियन्ते गावः+ इति । गवामेव मरणात्तस्य दरिद्रता न स्वरूपहानादिति समः समाधिः । लिङ्गमात्रम्-अलिङ्गस्य प्रत्यासन्नं, तत्र तत्+संसृष्टं विविच्यते क्रमानतिवृत्तेः । तथा षट्+अविशेषा लिङ्गमात्रे संसृष्टा विविच्यन्ते । परिणाम-क्रम-नियमात्। तथा तेषु+अविशेषेषु भूतेन्द्रियाणि संसृष्टानि विविच्यन्ते । तथा च+उक्तं पुरस्तात्। न विशेषेभ्यः परं तत्त्वान्तरमस्तीति विशेषाणां नास्ति तत्त्वान्तरपरिणामः । तेषां तु धर्म-लक्षण-अवस्था-परिणामा व्याख्यायिष्यन्ते ॥१९॥

व्याख्यातं दृश्यम् । अथ द्रष्टुः स्वरूप-अवधारणार्थम्+इदम्+अरभ्यते—

द्रष्टा दृशिमात्रः शुद्धः+अपि प्रत्यय-अनुपश्यः ॥२०॥

दृशिमात्र इति दृक्शक्तिः+एव विशेषणापरामृष्ट-इति+अर्थः । सः+ पुरुषः+ बुद्धेः प्रतिसंवेदी । सः बुद्धेः+न सरूपः+ नात्यन्तं विरूपः+ इति । न तावत्सरूपः । कस्मात्? ज्ञात-अज्ञात-विषयत्वात्-परिणामिनी हि बुद्धिः । तस्याः+च विषयः+ गवादिः+घटादिः+वा ज्ञातः+च+अज्ञातः+च+इति पर्णामित्वं दर्शयति । सदा-ज्ञात-विषयत्वं तु पुरुषस्य+अपरिणामित्वं परिदीपयति । कस्मात्? न हि बुद्धिः+च नाम पुरुष-विषयः+च स्यात्+गृहीता च+अगृहीता च+इति सिद्धं पुरुषस्य सदा-ज्ञात-विषयत्वं ततः+च+अपरिणामित्वम्+इति । किं च, परार्था बुद्धिः संहत्यकारित्वात। स्वार्थः पुरुष इति । तथा सर्वार्थ-अध्यवसायकत्वात्+त्रिगुणा बुद्धिः+त्रिगुणत्वाद्+अचेतन+इति ।

गुणानां तूपद्रष्टा पुरुषः+ इति । अतः+ न सरूपः । अस्तु तर्हि विरूपः+ इति । न-अत्यन्तं विरूपः । कस्मात्? शुद्धः+अपि+असौ प्रत्यय-अनुपश्यः । यतः प्रत्ययं बौद्धमनुपश्यति । तम्-अनुपश्यन्-न-तदात्मापि तदात्मकः+ इव प्रत्यवभासते । तथा चोक्तं—अपरिणामिनी हि भोक्तृ-शक्तिः+अप्रतिसङ्क्रमा च परिणामिनि+अन्यर्थे प्रतिसङ्क्रान्तेव तद्वृत्तमनुपतति । तस्याः+च प्राप्त-चैतन्यः+उपग्रह-रूपाया बुद्धि-वृत्तेः+अनुकारमात्रतया बुद्धि-वृत्ति+अविशिष्टा हि ज्ञान-वृत्तिः+इति+आख्यायते ॥२०॥

तदर्थ एव दृश्यस्य+आत्मा ॥२१॥

दृशि-रूपस्य पुरुषस्य कर्म-रूपतामापन्नं दृश्यमिति तदर्थ एव दृश्यस्य+आत्मा भवति ॥२१॥ तत्+स्वरूपं तु पररूपेण प्रतिलब्धात्मकं भोग-अपवर्गार्थतायां कृतायां पुरुषेण न दृश्यत इति । स्वरूप-हानादस्य नाशः प्राप्तः । न तु विनश्यति । कस्मात्?

कृतार्थं प्रति नष्टम्+अपि+अनष्टं तत्+अन्य-साधारणत्वात्॥२२॥

कृतार्थमेकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्यपुरुषसाधारणत्वात। कुशलं पुरुषं प्रति नाशं प्राप्तमप्यकुशलान्पुरुषान्प्रति न कृतार्थमिति तेषां दृशेः कर्मविषयतामापन्नं, लभत एव पररूपेणात्मरूपमिति । अतः+च दृक्+दृश-शक्त्योः+नित्यत्वात्+अनादिः संयोगो व्याख्यात इति । तथा च+उक्तं—धर्मिणामनादिसंयोगात्+धर्म-मात्राणाम्+अपि+अनादिः संयोगः इति ॥२२॥
संयोग-स्वरूप-अभिधित्स्य+इदं सूत्रं प्रववृते—

स्व-स्वामि-शक्त्योः स्वरूप+उपलब्धि-हेतुः संयोगः ॥२३॥

पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः । तस्मात्+दृश्यस्य+उपलब्धिः+या सः+ भोगः । या तु द्रष्टुः स्वरूपोपलब्धिः सः+अपवर्गः । दर्शन-कार्य+अवसानः संयोगः+ इति दर्शनं वियोगस्य कारणमुक्तम् । दर्शनम्-अदर्शनस्य प्रतिद्वद्न्वीत्यदर्शनं संयोग-निमित्तम्+उक्तम् । नात्र दर्शनं मोक्ष-कारणम् । अदर्शनाभावात्+एव बन्धाभावः, सः+ मोक्षः+ इति । दर्शनस्य भावे बन्धकृतस्य+अदर्शनस्य नाशः+ इतिअतः+ दर्शन-ज्ञानं

कैवल्यकारणम्+उक्तम् ।

किं च+इदम्+अदर्शनं नाम ? किं गुणानाम्+अधिकारः ? आहोस्वित्+दृशिरूपस्य स्वामिनः+ दर्शित-विषयस्य प्रधान-चित्तस्य+अनुत्पादः ? स्वस्मिन्+दृश्ये विद्यमाने यः+ दर्शनाभावः, किमर्थता गुणानां ? अथः+अविद्या स्वचित्तेन सह निरुद्धा स्वचित्तस्य+उत्पत्ति-बीजं ? किं स्थिति-संस्कारक्षये गति-संस्कार-अभिव्यक्तिः ? यत्रेदमुक्तं—प्रधानं स्थित्यैव वर्तमानं विकाराकरणात्-अप्रधानं स्यात्। तथा गति+एव वर्तमानं विकार-नित्यत्वात्+अप्रधानं स्यात्। उभयथा च+अस्य प्रवृत्तिः प्रधानव्यवहारं लभते न+अन्यथा । कारणान्तरेषु+अपि कल्पितेषु+एव समानः+चर्चः ।

दर्शन-शक्तिः+एव+अदर्शनम्+इति+एके । "प्रधानस्य-आत्म-ख्यापनार्था प्रवृत्तिः"+इति श्रुतेः । सर्व-बोध्य-बोध-समर्थः प्राक्प्रवृत्तेः पुरुषः+ न पश्यति । सर्व-कार्य-करणसमर्थं दृश्यं तदा न दृश्यतः+ इति । उभयस्य+अपि-दर्शनं धर्मः+ इति+एके । तत्र+इदं दर्शन्यस्य स्वात्मभूतमपि दृश्यप्रत्यय-अपेक्षं पुरुष-धर्मत्वेन+एव+अदर्शनम्+अवभासते । दर्शन-ज्ञानम्+एव+अदर्शनम्+इति केचित्+अभिदधति । इति+एते शास्त्रगता विकल्पाः । तत्र विकल्प-बहुत्वम्+एतत्+सर्व-पुरुषाणां गुणानां संयोगे साधारण-विषयम् ॥२३॥

यः+तु प्रत्यक्-चेतनस्य स्वबुद्धि-संयोगः—

तस्य हेतुः+अविद्या ॥२४॥

विपर्यय-ज्ञान-वासन+इति+अर्थः । विपर्यय-ज्ञान-वासनावासिता च न कार्य-निष्ठां पुरुष-ख्यातिं बुद्धिः प्राप्नोति । साधिकारा पुनरावर्तते । सा तु पुरुषख्याति-पर्यवसानां कार्यनिष्ठां प्राप्नोति । चरिताधिकारा निवृत्तादर्शना बन्ध-करणाभावान्न पुनरावर्तते । अत्र कः+चित्+षण्डकः+उपाख्यानेन+उद्घाटयति—मुग्धया भार्यया+अभिधीयते षण्डकः— "आर्यपुत्र ! अपत्यवती मे भगिनी किमर्थं नाहमिति" ? सः+ ताम्+आह— "मृतः+ते+अहम्+अपत्यम्+उत्पादयिष्यामि+" इति । तथेदं विद्यमानं ज्ञानं चित्त-निवृत्तिं न करोति विनष्टं करिष्यतीति का प्रत्याशा ? तत्राचार्यदेशीयो वक्ति—ननु बुद्धि-निवृत्तिः+एव मोक्षः । अदर्शन-कारणाभावाद्बुद्धिनि-वृत्तिः । तत्+च+अदर्शनं बन्धकारणं दर्शनान्+निवर्तते । तत्र चित्तः+निवृत्तिः+एव मोक्षः । किमर्थम्+अस्थानम्-एव-अस्य

मतिविभ्रमः ? ॥२४॥

हेयं दुःखम् । हेय-कारणं च संयोगाख्यं स-निमित्तम्-उक्तम् । अतः परं हानं वक्तव्यम्—

तत्+अभावात्+संयोग-अभावः+ हानम् । तद्+दृशेः कैवल्यम् ॥२५॥

तस्य+अदर्शनस्य+अभावात्+बुद्धि-पुरुष-संयोगाभाव आत्यन्तिकः+ बन्धनोपरमः+ इति+अर्थः । एतद्धानम् । तद्दृशेः कैवल्यं पुरुषस्यामिश्रीभावः पुनः+असंयोगः+ गुणैः+इति+अर्थः । दुःख-कारण-निवृत्तौ दुःखोपरमो हानम् । तदा स्वरूप-प्रतिष्ठः पुरुषः+ इति+उक्तम् ॥२५॥

विवेक-ख्यातिः+अविप्लवा हान-उपायः ॥२६॥

सत्त्व-पुरुषान्व्यता-प्रत्ययः+ विवेक-ख्यातिः । सा तु+अनिवृत्त-मिथ्या-ज्ञाना प्लवते । यदा मिथ्या-ज्ञानं दग्ध-बीज-भावं बन्ध्यप्रसवं सम्पद्यते, तदा विधूत-क्लेश-रजसः सत्त्वस्य परे वैशारद्ये परस्यां वशीकार-संज्ञायां वर्तमानस्य विवेक-प्रत्यय-प्रवाहः+ निर्मलः+ भवति । सा विवेक-ख्यातिः+अविप्लवा हानस्य+उपायः । ततः+ मिथ्या-ज्ञानस्य दग्ध-बीजभावः+उपगमः । पुनः+च+अप्रसव इति+एष मोक्षस्य मार्गो हासन्योपाय इति ॥२६॥

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥

तस्येति प्रत्युदित-ख्यातेः प्रत्याम्नायः । सप्तधा+इति+अशुद्ध्या-आवरण-मलापगमात्+चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारः+एव प्रज्ञा विवेकिनः+ भवति । तद्यथा—

(1) परिज्ञानं हेयं नास्य पुनः परिज्ञेयमस्ति ।

(2) क्षीणाः हेय-हेतवः+ न पुनः+एतेषां क्षेतव्यमस्ति ।

(3) साक्षात्कृतं निरोध-समाधिना हानम् ।

(4) भावितः+ विवेक-ख्याति-रूपः+ हानोपायः+ इति ।

एषा चतुष्टयी कार्यविमुक्तिः प्रज्ञायाः । चित्तविमुक्तिस्तु त्रयी—

(5) चरित-अधिकारा बुद्धिः ।

(6) गुणा गिरि-शिखर-कूटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां प्रविलीनानां पुनः+सत्युत्पादः प्रयोजनाभावादिति ।

(7) एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति ।

एतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन्पुरुषः कुशलः+ इत्याख्यायते । प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशलः+ इत्येव भवति गुणातीतत्वादिति ॥२७॥

सिद्धा भवति विवेकख्यातिः+हानोपायः+ इति । न च सिद्धिरन्तरेण साधनमित्येतदारभ्यते—

योग-अङ्ग-अनुष्ठानात्+अशुद्धिक्षये ज्ञान-दीप्तिः+आ-विवेकख्यातेः ॥२८॥

योग-अङ्गानि+अष्टौ+अभिधायिष्यमानानि । तेषाम्+अनुष्ठानात्+पञ्च-पर्वणः+ विपर्यस्य+अशुद्धिरूपस्य क्षयः+ नाशः । तत्+क्षये सम्यक्+ज्ञानस्य+अभिव्यक्तिः ।
यथा यथा च साधनान्+अनुष्ठीयन्ते, तथा तथा तनुत्वम्-अशुद्धिरापद्यते।
यथा यथा च क्षीयते तथा तथा क्षयक्रम-अनुरोधिनी ज्ञानस्यापि दीप्तिः+विवर्धते । सा खलु+एषा विवृद्धिः प्रकर्ष-मनु-भवति-अविवेकख्यातेः, आ गुण-पुरुषस्वरूप-विज्ञानात्+इति+अर्थः ।

योग-अङ्ग-अनुष्ठानम्+अशुद्धेः+वियोग-कारणम् । यथा परशुः+छेद्यस्य । विवेक-ख्यातेः+तु प्राप्तिकारणं यथा धर्मः सुखस्य, ना+अन्यथा कारणम् ।
कति च+एतानि कारणानि शास्त्रे भवन्ति ? नव+एव+इति+आह। तद्यथा–
"उत्पत्ति-स्थिति-अभिव्यक्ति-विकार-प्रत्यय-आप्तिः+अयः ।
वियोगानि+अन्यत्व-धृतयः कारणं नवधा स्मृतम् ॥" इति ।
तत्र+उत्पत्ति-कारणं मनः+ भवति विज्ञानस्य । स्थिति-कारणं मनसः पुरुषार्थता शरीरस्य-एव-आहारः+ इति । अभिव्यक्ति-कारणं यथा रूपस्य-अलोकः+तथा रूप-ज्ञानम्। विकारकारणं मनसः+ विषयान्तरम्, यथा+अग्निः पाक्यस्य । प्रत्यय-कारणं

धूम-ज्ञानम्+अग्नि-ज्ञानस्य । प्राप्ति-कारणं योग-अङ्ग-अनुष्ठानं विवेक-ख्यातेः । वियोग-कारणं तत्+एव+अशुद्धेः । अन्यत्व-कारणं, यथा सुवर्णस्य सुवर्णकारः । एवम्+एकस्य स्त्री-प्रत्ययस्य+अविद्या मूढत्वे, द्वेषः+ दुःखत्वे, रागः सुखत्वे, तत्त्व-ज्ञानं माध्यस्थ्ये । धृति-कारणं शरीरम्+इन्द्रियाणाम् । तानि च तस्य । महाभूतानि शरीराणाम् । तानि च परस्परं सर्वेषाम् । तैर्यग्यौन्-अमानुष-दैवतानि च परस्पर-अर्थत्वात्। इति+एवं नव-कारणानि । तानि च यथा-सम्भवं पदार्थ+अन्तरेषु+अपि योज्यानि । योग-अङ्ग-अनुष्ठानं तु द्विधा+एव कारणत्वं लभतः इति ॥२८॥

अथ योग-अङ्गानि+अवधार्यन्ते—

यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोः+अष्टौ+अङ्गानि ॥२९॥

यथा-क्रमम्-एतेषाम्-अनुष्ठानं स्वरूपं च वक्ष्यामः ॥२९॥

तत्र—

अहिंसा-सत्य+आस्तेय-ब्रह्मचर्य+अपरिग्रहा यमाः ॥३०॥

तत्र+अहिंसा सर्वथा सर्वदा सर्व-भूतानाम्-अनभिद्रोहः । उत्तरे च यम-नियमाः+तन्मूलाः+तत्सिद्धि-परतया तत्+प्रतिपादनाय प्रतिपाद्यन्ते, तदवदात्-अरूपकरणाय+एव+उपादीयन्ते । तथा च+उक्तं—“न खलु+अयं ब्राह्मणः+ यथा यथा व्रतानि बहूनि समादित्सते, तथा तथा प्रमादकृतेभ्यः+ हिंसा-निदानेभ्यः+ निवर्तमानः+ताम्-एव-अवदातरूपाम्-अहिंसां करोति” । सत्यं यथा-अर्थे वाक्+मनसे, यथा दृष्टं यथा-अनुमितं यथा श्रुतं, तथा वाक्+मनः+च+इति ।

परत्र स्वबोध-सङ्क्रान्तये वाक्+युक्ता, सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्ति-बन्ध्या वा भवेदिति । एषा सर्वभूत-उपकारार्थं प्रवृत्ता न भूतोपघाताय । यदि च+एवम्-अपि+अभिधीयमाना भूतोपघातपः+एव स्यात्-न सत्यं भवेत्, पापमेव भवेत्। तेन पुण्य-अभासेन पुण्य-प्रतिरूपकेण कष्टतमं प्राप्नुयात्, तस्मात्-परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्।

स्तेयम्-अशास्त्र-पूर्वकं द्रव्याणां परतः स्वीकरणम् । तत्+प्रतिषेधः पुनः+अस्पृहा-रूपम्-अस्तेयम्-इति । ब्रह्मचर्यं गुप्त+इन्द्रियस्य+उपस्थस्य संयमः । विषयाणाम्+अर्जनरक्षण-क्षय-सङ्गहिंसा-दोष-दर्शनात्-अस्वीकरणम्-अपरिग्रह इति+एते यमाः ॥३०॥

ते तु—

जाति-देश-काल-समय-अनवच्छिन्नाः सार्वभौमा महाव्रतम् ॥३१॥

तत्र+अहिंसा जाति+अवच्छिन्ना मत्स्य-बन्धकस्य मत्स्येषु+एव न+अन्यत्र हिंसा । सैव देश-अवच्छिन्ना न तीर्थे हनिष्यामि-इति । सैव कालावच्छिन्ना न चतुर्दश्यां, न पुण्येऽहनि हनिष्यामि-इति । सैव त्रिभिः+उपरतस्य समयावच्छिन्ना देव-ब्राह्मणार्थे न+अन्यथा हनिष्यामीति । यथा च क्षत्रियाणां युद्धः+ एव हिंसा न+अन्यत्र+इति । एभिः+जाति-देश-काल-समयैः+अनवच्छिन्ना अहिंसादयः सर्वथा+एव परिपालनीयाः । सर्वभूमिषु सर्वविषयेषु सर्वथैवाविदित-व्यभिचाराः सार्वभौमा महाव्रतम्-इति-उच्यते ॥३१॥

शौच-सन्तोष-तपः-स्वाध्याय+ईश्वर-प्रणिधानानि नियमाः ॥३२॥

तत्र शौचं मृत्+जलादि-जनितं मेध्याभ्यवहरणादि च बाह्यम्, आभ्यन्तरं चित्त-मलानाम्-आक्षालनम् । सन्तोषः सन्निहित-साधनात्+अधिकस्य-अनुपादित्सा । तपः+ द्वन्द्वसहनम् । द्वन्द्वः+च जिघत्सा-पिपासे, शीत-उष्णे, स्थानासने, काष्ठ-मौनाकार-मौने च । व्रतानि च+एषां यथा-योगं कृच्छ्र-चान्द्रायण-सान्तापनादीनि । स्वाध्यायः+ मोक्ष-शास्त्राणाम्+अध्ययनं प्रणवजपः+ वा । ईश्वर-प्रणिधानं तस्मिन्-परमगुरौ सर्व-कर्मार्पणम् । “शय्यासनस्थः+अथ पथि व्रजन्वा स्वस्थः परिक्षीणवितर्कजालः । संसार-बीजक्षयम्+ईक्षमाणः स्यात्+नित्य-मुक्तः+अमृत-भोग-भागी ॥”

यत्र+इदम्-उक्तं— “ततः प्रत्यक्-चेतन-अधिगमः+अपि-अन्तराय-अभावः-च [यो.सू. १.२९] इति ॥३२॥

एत-एषां यम-नियमानां—

वितर्क-बाधने प्रतिपक्ष-भावनम् ॥३३॥

यदास्य ब्राह्मणस्य हिंसादयः+ वितर्का जायेरन्। हनिष्यामि+अहम्-अपकारिणम्-अनृतमपि वक्ष्यामि, द्रव्यमपि+अस्य स्वीकरिष्यामि, दारेषु च+अस्य व्यवायी भविष्यामि, परिग्रहेषु च+अस्य स्वामी भविष्यामि-इति । एवम् -उन्मार्ग-प्रवण-वितर्क-ज्वरेण-अतिदीप्तेन बाध्यमानः+तत्प्रति-पक्षान्भवयेत्। घोरेषु संसार-अङ्गारेषु पच्यमानेन मया शरणम्-उपागतः सर्वभूता-भय-प्रदानेन योग-धर्मः । सः+ खलु+अहं त्यक्त्वा वितर्कान्+पुनः+तान्+आददानः+तुल्यः श्ववृत्तेन+इति भावयेत्। यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनः+आददान इति, एवम्+आदि सूत्रान्तरेषु-अपि योज्यम् ॥३३॥

वितर्का हिंसादयः कृत-कारित-अनुमोदिता लोभ-क्रोध-मोहपूर्वका मृदु-मध्य-अधिमात्रा दुःख-अज्ञान-अनन्तफलाः+ इति प्रतिपक्ष-भावनम् ॥३४॥

तत्र हिंसा तावत्—कृत-कारित-अनुमोदितेति त्रिधा । एकैका पुनः+त्रिधा—लोभेन मांस-चर्मार्थेन, कोर्धेन-अपकृतमनेनेति, मोहेन धर्मः+ मे भविष्यति+इति । लोभ-क्रोध-मोहाः पुनः+त्रिविधा मृदु-मध्य-अधिमात्रा इति । एवं सप्त-त्रिंशतिः+भेदा भवन्ति हिंसायाः । मृदु-मध्य-अधिमात्राः पुनः+त्रिविधाः—मृदुमृदुः+मध्यमृदुः+तीव्रमृदुः+इति । तथा मृदुमध्यः+ मध्यमध्यः+ तीव्रमध्यः+ इति । तथा मृदुतीव्रः+ मध्यतीव्रः+ अधिमात्रतीव्रः+ इति । एवम्-एक-अशीति-भेदाः+ हिंसाः+ भवति । सा पुनः+ नियम-विकल्प-समुच्चय-भेदात्+असङ्ख्येया प्राणभृद्भेदस्य+अपरिसङ्ख्येयत्वात्+इति । एवम्-अनृतादिषु+अपि योज्यम् । ते खलु+अमी वितर्काः—दुःख-अज्ञान-अनन्तफला इति प्रतिपक्ष-भावनम् । दुःखम्-अज्ञानं च-अनन्तं फलं येषाम्-इति प्रतिपक्ष-भावनम् । तथा च हिंसकः+तावत्-प्रथमं बध्यस्य वीर्यमाक्षिप्तति, ततः+च शस्त्रादि-निपातेन दुःखयति । ततः+ जीवितादपि मोचयति । ततः+ वीर्याक्षेपादस्य चेतन-अचेतनमुपकरणं क्षीणवीर्यं भवति । दुःखः+उत्पादान्+नरक-तिर्यक्-प्रेतादिषु दुःखम्-अनुभवति । जीवन्त-व्यपरोपणात्-प्रतिक्षणं च जीवितात्यये वर्तमानो मरणम्-इच्छन्-अपि

दुःख-विपाकस्य नियत-विपाक-वेदनीयत्वात्-कथम्-चित्-एवोच्छ्वसिति । यदि च कथम्-चित्त्-पुण्यावापगता हिंसा भवेत्, तत्र सुख-प्राप्तौ भवेदल्पायुः+इति । एवम्+अनृतादिषु+अपि योज्यं यथा-सम्भवम् । एवं वितर्काणां चामुमेवानुगतं विपाकम्-अनिष्टं भावयन्-न वितर्केषु मनः प्रणिदधीत ॥३४॥

प्रतिपक्ष-भावनाहेतोः+हेया वितर्का यदास्य स्युः+अप्रसवधर्माणः, तदा तत्-कृतम्-एश्वर्यं योगिनः सिद्धि-सूचकं भवति । तद्यथा—

अहिंसा-प्रतिष्ठायां तत्-सन्निधौ वैर-त्यागः ॥३५॥

सर्व-प्राणिनां भवति ॥३५॥

सत्य-प्रतिष्ठायां क्रिया-फल-आश्रयत्वम् ॥३६॥

धार्मिकः+ भूयाः+ इति भवति धार्मिकः । स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति । अमोघास्य वाग्भवति ॥३६॥

अस्तेय-प्रतिष्ठायां सर्वरत्न-उपस्थानम् ॥३७॥

सर्व-दिक्स्थान्यस्य-उपतिष्ठन्ते रत्नानि ॥३७॥

ब्रह्मचर्य-प्रतिष्ठायां वीर्य-लाभः ॥३८॥

यस्य लाभात्+अप्रतिघान्+गुणान्+उत्कर्षयति । सिद्धः+च विनेयेषु ज्ञानम्+अधातुं समर्थः+ भवति+इति ॥३८॥

अपरिग्रह-स्थैर्ये जन्म-कथंतासंबोधः ॥३९॥

अस्य भवति । कः+अहमासं ? कथम्-अहमासं ? किं स्विदिदं ? कथं स्विदिदं ? के वा भविष्यामः ? कथं वा भविष्यामः ? इत्येवम्+अस्य पूर्वान्त-परान्त-मध्येषु+आत्म-भाव-जिज्ञासा स्वरूपेण+उपावर्तते । एता यम्स्थैर्ये सिद्धयः

॥३९॥

नियमेषु वक्ष्यामः—

शौचात्+स्वाङ्ग-जुगुप्सा परैः+असंसर्गः ॥४०॥

स्वाङ्गे जुगुप्सायां शौचम्+आरम्भमाणः कायावद्यदर्शी कायानभिष्वङ्गी यतिः+भवति । किं च, परिरसंसर्गः कायस्वभावावलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिम्+अपश्यन्कथं परकायैः+अत्यन्तमेवाप्रयतैः संसृज्येत ॥४०॥

किं च,

सत्त्व-शुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥४१॥

भवन्ति+इति वाक्य-शेषः । शुचेः सत्त्व-शुद्धिः, ततः सौमनस्यं, ततः+ ऐकाग्र्यम्, ततः+ इन्द्रिय-जयः, ततः+च+आत्म-दर्शन-योग्यत्वं, बुद्धि-सत्त्वस्य भवति+इति+एतत्+ शौच-स्थैर्यात्+अधिगम्यत इति ॥४१॥

सन्तोषात्+अनुत्तमः सुख-लाभः ॥४२॥

तथा चोक्तं—

"यत्+च काम-सुखं लोके यत्+च दिव्यं महत्+सुखम् ।
तृष्णा-क्षय-सुखस्यैते नार्हतः षोडशीं कलाम् ॥" इति ॥४२॥

काय+इन्द्रिय-सिद्धिः+अशुद्धि-क्षयात्तपसः ॥४३॥

निर्वर्त्यमानमेव तपो हिनस्त्यशुद्ध्यावरणफलम् । तदावरणमलापगमात्कायसिद्धिरणिमाद्या, तथेन्द्रियसिद्धिर्दूराच्छ्रवणदर्शनाद्येति ॥४३॥

स्वाध्यायात्+इष्टदेवता-सम्प्रयोगः ॥४४॥

देवा ऋषयः सिद्धाः+च स्वाध्याय-शीलस्य दर्शनं गच्छन्ति, कार्ये च+अस्य वर्तन्त इति ॥४४॥

समाधि-सिद्धिः+ईश्वर-प्रणिधानात्॥४५॥

ईश्वर-आर्पित-सर्व-भावस्य समाधि-सिद्धिः+यया सर्वम्+ईप्सित-भवितथं जानाति देश-अन्तरे देह-अन्तरे कालान्तरे च । ततः+अस्य प्रज्ञा यथा-भूतं प्रजानातीति ॥४५॥

स्थिर-सुखम्-आसनम् ॥४६॥

तत्+यथा पद्मासनम्, वीरासनं, भद्रासनं, स्वस्तिकं, दण्डासनं, सोपाश्रयं, पर्यङ्कं, क्रौञ्चनिषदनं, हस्ति-निषदनम्+उष्ट्र-निषदनं, समसंस्थानम्, स्थिर-सुखं यथा-सुखं+च+ इति+एवम्+आदीनि ॥४६॥

प्रयत्न-शैथिल्या-अनन्त-समापत्तिभ्याम् ॥४७॥

भवति+इति वाक्य-शेषः । प्रयत्न-उपरमात्+सिध्यति+आसनं येन न+अङ्गमेजयः+ भवति । अनन्ते वा समापन्नं चित्तमासनं निर्वर्तयति+इति ॥४७॥

ततः+ द्वन्द्व-अनभिघातः ॥४८॥

शीत+उष्णादिभिः+द्वन्द्वैः+आसनजयात्+न+अभिभूयते ॥४८॥

तस्मिन्+इति श्वास-प्रश्वासयोः+गति-विच्छेदः प्राणायामः ॥४९॥

सत्यासनजये बाह्यस्य वायोः+आचमनं श्वासः । कोष्ठ्यस्य वायोः+निःसारणं प्रश्वासः । तयोः+गति-विच्छेद उभय-अभावः प्राणायामः ॥४९॥

स तु—

बाह्य-अभ्यन्तर-स्तम्भवृत्तिः देश-काल-संख्याभिः परिदृष्टोः+ दीर्घ-सूक्ष्मः ॥५०॥

यत्र प्रश्वास-पूर्वको गति+अभावः स बाह्यः । यत्र श्वास-पूर्वको गति+अभावः सः+ आभ्यन्तरः । तृतीयः स्तम्भ-वृत्तिः+यत्र+उभयाभावः सकृत्प्रयन्तात्+भवति । यथा तप्ते न्यस्तमुपले जलं सर्वतः सङ्कोचम्+आपद्यते, तथा द्वयोः+युगपत्+भवति+अभावः+ इति ।

त्रयोः+अपि+एते देशेन परिदृष्टाः—इयानस्य विषयः+ देशः इति । कालेन परिदृष्टाः क्षणानाम्+इयत्त-अवधारणेन+अवच्छिन्नाः+ इति+अर्थः । सङ्ख्याभिः परिदृष्टाः—एतावद्भिः श्वास-प्रश्वासैः प्रथम उद्घात-स्तद्वन्नि-गृहीतस्य+एतावद्भिः+द्वितीय उद्घातः+ एवं तृतीयः । एवं मृदुः+एवं मध्यः+ एवं तीव्रः+ इति सङ्ख्यापरिदृष्टः । सः+ खलु+अयम्+एवम्+अभ्यस्तः+ दीर्घ-सूक्ष्मः ॥५०॥

बाह्य-अभ्यन्तर-विषय-अक्षेपी चतुर्थः ॥५१॥

देश-काल-सङ्ख्याभिः+बाह्य-विषयः परिदृष्ट आक्षिप्तः। तथा+अभ्यन्तर-विषयाक्षः परिदृष्टः+ आक्षिप्तः, उभयथा दीर्घ-सूक्ष्मः । तत्+पूर्वको भूमिजयात्+क्रमेण+उभयोः+गति+इति+अभावः+चतुर्थः प्राणायामः । तृतीयः+तु विषयान्+आलोचितः+ गति+अभावः सकृत्+आरब्ध एव देशकालसङ्ख्याभिः परिदृष्टः+ दीर्घ-सूक्ष्मः । चतुर्थः+तु श्वास-प्रश्वासयोः+विषय-अवधारणात्+क्रमेण भूमि-जयात्+उभय-आक्षेप-पूर्वकः+ गतिः+अभावः+चतुर्थः प्राणायामः+ इति+अयं विशेषः ॥५१॥

ततः क्षीयते प्रकाश-आवरणम् ॥५२॥

प्राणायामान्+अभ्यस्यतः+अस्य योगिनः क्षीयते विवेक-ज्ञान-आवरणीयं कर्म, यत्तत्+आचक्षते— “महामोहमयेन+इन्द्रजालेन प्रकाश-शीलं सत्त्वमावृत्य तदेव+अकार्ये नियुङ्क्ते” इति । तदस्य प्रकाशावरणं कर्म संसार-निबन्धनं प्राणायाम-अभ्यासात्+दुर्बलं भवति प्रतिक्षणं च क्षीयते । तथा च+उक्तम्—तपः+ न परं प्राणायामात्+ततः+विशुद्धिः+मलानां दीप्तिः+च ज्ञानस्य इति ॥५२॥

किं च,

धारणासु च योग्यता मनसः ॥५३॥

प्राणायाम-अभ्यासात्+एव । ‘प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य’ [यो.सू. १.३५] इति वचनात्॥५३॥

स्वस्व-विषय-असंप्रयोगे चित्तस्य स्वरूपानुकारः+ इव+इन्द्रियाणां प्रत्याहारः ॥५४॥

स्व-विषय-संप्रयोगाभावे चित्त-स्वरूपानुकारः+ इव+इति चित्तनिरोधे चित्तवत्+निरुद्धानि+इन्द्रियाणि न+इतर+इन्द्रियजयवत्+उपायान्तरम्+अपेक्षन्ते । यथा मधुकर-राजं मक्षिका उत्पतन्तम्-अनूत्पतन्ति, निविशमानम्-अनुनिविशन्ते तथा+इन्द्रियाणि चित्त-निरोधे निरुद्धानि+इति+एषः प्रत्याहारः ॥५४॥

ततः परमा वश्यता+इन्द्रियाणाम् ॥५५॥

शब्द-आदिषु-अव्यसनम्-इन्द्रियजयः इति केचित। सक्तिः+व्यसनं व्यस्यत्येनं श्रेयसः+ इति अविरुद्धा प्रतिपत्तिर्न्याय्या । शब्दादि-सम्प्रयोगः स्वेच्छयेत्यन्ये । राग-द्वेष-अभावे सुख-दुःखशून्यं शब्दादि-ज्ञानम्-इन्द्रियजयः+ इति केचित्। चित्त-एकाग्र्यात् अप्रतिपत्तिः+एव+इति जैगीषव्यः । ततः+च परमा त्वियं वश्यता यत्+चित्त-निरोधे निरुद्धानि+इन्द्रियाणि न+इतर+इन्द्रियजयवत्+प्रयत्नकृतम्+उपायान्तरम्+अपेक्षन्ते योगिनः+ इति ॥५५॥

इति पतञ्जलिविरचिते योगसूत्रे द्वितीयः साधनपादः ।